राधादियोजनं। अन्येन विरोधे स्वार्थसम्बन्धितया राजसमीपे कथनं। आइास नालिश इति ख्यातः। यथा,—

"अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्"।

इति याज्ञवल्क्यः॥ युद्धार्थाह्वानं। इति रायमुकुटः॥ अपकारकरणेच्छापूर्ब्बकाक्रमणं। तत्पर्य्यायः। अभिग्रहः २। इत्यमरः॥ उद्योगः। इति हेमचन्द्रः॥

("स प्रापदप्राप्तपराभियोगं
नगेन्द्रगुप्तं नगरं मङ्क्षतात्"।
इति कुमारसम्भवे।)

अभिरामः, त्रि, (अभिरमते मनोऽत्र, अभि+रम्+आधारे घञ्।) रुचिरः। सुन्दरः। इति हेमचन्द्रः॥ (मनोहरः। मनोज्ञः। रमणीयः। आनन्दकरः।

"मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः"।
इति रघुवंशे।)

अभिरूप, पुं, (अभिलक्ष्यं रूपमस्य।) पण्डितः। इति हेमचन्द्रः॥ कामदेवः। चन्द्रः। शिवः। विष्णुः। इति शब्दरत्नावली॥

अभिरूपः, त्रि, (अभिरूपयति शास्त्रार्थं निरूपयति, अभिरूप+णिच्+अच्।) मनोहरः। पण्डितः। इति मेदिनी॥ ("इयं हि रसभावविशेषदीक्षागुरोः विक्रमादित्यस्याभिरूपभूयिष्ठा परिषद्"। इति शाकुन्तले।)

अभिलापः, पुं, (अभिलप्यते मानसं कर्म्म कथ्यतेऽनेन, अभि+लप्+करणे घञ्।) शब्दः। इति त्रिकाण्डशेषः॥ सङ्कल्पाङ्गवाक्यं। यथा। "काम्याभिलापसहितः कुशतिलजलत्यागरूपः सङ्कल्पः शास्त्रार्थः"। इति प्रक्रमाधिकरणं॥ (वचनं। कथनं। वाक्यं।

"तथाभिलापसंसर्गयोग्यत्वविरहान्न च।
सविकल्पकसंवेद्यः"। इति साहित्यदर्पणे।)

अभिलावः, पुं, (अभि+लू+भावे घञ्।) छेदनं। इत्यमरः॥

अभिलाषः, पुं, (अभि+लष+भावे घञ्।) लोभः। तत्पर्य्यायः। इच्छा २ आकाङ्क्षा ३ स्पृहा ४ ईहा ५ तृट् ६ वाञ्छा ७ लिप्सा ८ कामः ९ तर्षः १० मनोरथः ११। इत्यमरः॥ काङ्क्षा १२ कान्तिः १३ रुक् १४ रुचिः १५ दोहदः १६ अभिलासः १७। इति शब्दरत्नावली॥ श्रद्धा १८ तृष्णा १९ मतिः २० छन्दः २१। इति जटाधरः॥ ("भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः"। इति शाकुन्तले। "अत्रोऽभिलाषे प्रथमं तथाविधे"। इति रघुवंशे।) सङ्गमेच्छा २२। इति रसमञ्जरी॥

अभिलाषी, [न्] त्रि, (अभि+लष्+णिनि।) अभिलाषयुक्तः। यथा,—

"जलाभिलाषी जलमाददानां
छायेव तां भूपतिरन्वगच्छत्"।
इति रघुवंशे॥

अभिलाषुकः, त्रि, (अभि+लष्+शीलार्थे उकञ्।) अभिलाषयुक्तः। तत्पर्य्यायः। लुब्धः २ गृध्नुः ३ गर्द्धनः ४ तृष्णक् ५। इत्यमरः॥ लोभी ६ विलासविभवासः ७। इति जटाधरः॥ ("जयमत्रभवान् नूनमरातिष्वभिलाषुकः"। इति भारविः।)

अभिलासः, पुं, (अभि+लस्+भावे घञ्।) अभिलाषः। इच्छा। इत्यमरटीकासारसुन्दरी॥

अभिवादः, पुं, (अभि+वद+भावे घञ्।) अप्रियवाक्यं। तत्पर्य्यायः। पारुष्यं २। इत्यमरः॥ (वन्दना। प्रणतिः। प्रणामः।

"अभिवादात्परं विप्रो ज्यायांसमभिवादयन्।
असौनामाहमस्मीति स्वं नाम परिकीर्त्तयेत्"॥
इति मनुः।)

अभिवादकः, त्रि, (अभि+वद्+णिच्+ण्वुल्।) वन्दनशीलः। तत्पर्य्यायः। वन्दारुः २। इत्यमरः॥ अप्रियवक्ता। पारुष्यार्थाभिपूर्ब्बवदेः कर्त्तरि णकः॥ (प्रणामकारी। अभिवादनकारी।

"आगतोऽस्मीत्युवाचैनं भवन्तमभिवादकः"।
इति नलोपाख्यानं।)

अभिवादनं, क्ली, (अभिमुखीकरणाय वादनं नामोच्चारणपूर्ब्बकनमस्कारः, अभि+वद्+णिच् भावे ल्युट्।) नामोच्चारणपूर्ब्बकनमस्कारः। अभिवादये भो अमुकशर्म्माहमित्येवंरूपः। तत्तु पादस्पर्शपूर्ब्बकनमस्कारः। तत्पर्य्यायः। पादग्रहणं २। इत्यमरः॥

("अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि संप्रवर्द्धन्ते आयुर्विद्यायशोबलं"॥
इति मनुः।)

अभिव्याप्तिः, स्त्री, (अभि+वि+आप्+भावे क्तिन्।) सर्व्वत्रावस्थानं। सर्व्वतोवृत्तिः। तत्पर्य्यायः। संमूर्च्छनं २। इत्यमरः॥

अभिशपनं, क्ली, (अभि+शप्+भावे ल्युट्।) मिथ्याभिशंसनं। अभिशापः। अभिपूर्ब्बशपधातोर्भावेऽनट्॥

अभिशप्तः, त्रि, (अभि+शप्+क्तः।) प्राप्ताभिशापः। शापग्रस्तः। यथा,—

"न नामग्रहणं कुर्य्यात् क्षपणस्य गुरोस्तथा।
भार्य्याया अभिशप्तस्य जनकस्य विशेषतः"॥
इति मेघदूतटीका॥

("न क्रुध्यत्यभिशप्तोऽपि क्रोधनीयानि वर्ज्जयन्"। इति रामायणे। "अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्"। इति कुमारसम्भवे।)

अभिशस्तः, त्रि, (अभि+शन्स+क्तः।) परस्त्रियां परपुरुषे वा मैथुनं प्रति मिथ्यादूषितः। मैथुनं प्रति आहूतः। इति केचित्। उपपन्नपातकः। इति केचित्। मिथ्यादूषितमात्रं। इति केचित्। इति भरतः॥ तत्पर्य्यायः। आक्षारितः २ क्षारितः ३। इत्यमरः॥ (प्राप्तापवादः। अभिपतुष्टः।

"वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा।
नाग्निर्ददाह रोमाणि सत्येन जगतः स्पृशः"॥
इति मनुः। विनिन्दितः। विगर्हितः। पातककर्त्ता। [इति मनुः।)

"पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी"।

अभिशस्तिः, स्त्री, (अभि+शन्स+भावे क्तिन्।) लोकापवादः। इति हेमचन्द्रः॥ ("स्यमन्तकं च सत्राजिताय दत्त्वा मिथ्याभिशस्तिविशुद्धम् अवाप"। इति विष्णुपुराणे।) याच्ञा। इत्यमरः॥

अभिशापः, पुं, (अभि+शप्+घञ् वृद्धिः।) स्वर्णस्तेयं त्वया कृतमित्यादिमिथ्यादूषणं वाक्यं। मिथ्यापवादः। तत्पर्य्यायः। मिथ्याभिशंसनं २। इत्यमरः॥ क्रोधात् द्विजादिभिर्दुःखाभिधारणं। इति पुराणं॥ ब्राह्मणगुरुवृद्धसिद्धानां अभिशापभिशंसनं। इति विजयरक्षितः॥

("यस्याभिशापात् दुःखार्त्तो दुःखं विन्दति नैषधः"।
इति नलोपाख्याने।)

अभिषङ्गः, पुं, (अभि+सन्ज+घञ् उपसर्गादिति षः।) पराजयः। आक्रोशः। शपथः। इति मेदिनी॥ मिथ्यापवादः। इति मथुरानाथः॥ आलिङ्गनं। इत्यमरटीकायां रायमुकुटः॥ सर्व्वतोभावेन सङ्गः। इति हलायुधः॥ भूताद्यावेशः। यथा,—

"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः"।
इति माधवकरः॥ (पराभवः। परिभूतिः।

"जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः"।
इति रघुवंशे।

"तीव्राभिषङ्गप्रभवेन वृत्तिं
मोहेन संस्तम्भयतेन्द्रियाणां"।
इति कुमारसम्भवे। शोकः। दुःखं। "अभिषङ्गजड़ं विजज्ञिवानिति शिष्येण किलान्वबोधयत्"। इति रघुः।)

अभिषवः, पुं, (अभि+सु+अप्, गुणः षत्वञ्च।) यज्ञः। स्नानं। मद्यसन्धानं। तत्तु चिरस्थापितमदोत्पादकद्रव्यं। इति मेदिनी॥ यज्ञस्नानं सोमलतापानञ्च। तत्पर्य्यायः। सुत्या २ सवनं ३। इत्यमरः॥

("भवेदभिषवः स्नाने मद्ये सन्धानयज्ञयोः"।
इति मेदिनी)

अभिषवं, क्ली, काञ्जिकं। इति हलायुधः॥ काँजि इति भाषा।

अभिषुतं, क्ली, (अभि+सु+क्तः षत्वं।) काञ्जिकं। इत्यमरः॥

अभिषेकः, पुं, (अभि+सिच्+भावे घञ्।) स्नानं। इति त्रिकाण्डशेषः॥

("एकदा सोऽभिषेकार्थमाजगाम महानदीं"।
इति विष्णुपुराणे।

"निर्वृत्तपर्य्यन्यजलाभिषेकां।
वासोवसानाममिषेकयोग्यं"।
इति कुमारसम्भवे।)

अथ ७दोलयात्राभिषेकद्रव्याणि लिख्यन्ते। शीतलजलं १ गोमयं २ गोमूत्रं ३ दुग्धं ४ दधि ५ घृतं ६ कुशोदकं ७ शङ्खोदकं ८ चन्दनोदकं ९ कुङ्कुमोदकं १० फलोदकं ११ पुष्पोदकं १२ चन्दनपिष्टामलक्युद्वर्त्तनं १३ सुगन्धिजलं १४ तेनाष्टवारस्नानं तत्र द्वितीयसप्तमाष्टमवारेषु दुग्धघृत-